श्रीसायीश्वराय नमः। हरिः ॐ।

śrīsāyīśvarāya namaḥ | hariḥ om |

- आशुश्शिशानो कवचं -

- āśuśśiśāno kavacaṁ -

आशुस्ः शिशानो वृषभो न युध्मो घनाघनः क्षोभणस्चर् षणिनाम्। संक्रंदनोऽनिमिष एकवीरः शतं सेना अजयस्ताक मिंद्रः॥

āśusḥ śiśāno vṛṣabho na yudhmo ghanāghanaḥ kṣobhaṇascar ṣaṇinām| saṅkrandano'nimiṣa ekavīraḥ śatagṁ senā ajayastāka mindraḥ||

सक्रंदनेना निमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। त दिन्द्रेण जयत तथ्सहध्वं युधो नर इषुहस्तेन वृष्णा॥

sakrandanenā nimiṣeṇa jiṣṇunā yutkāreṇa duścyavanena dhṛṣṇunā| ta dindreṇa jayata tathsahadhvaṁ yudho nara iṣuhastena vṛṣṇā||

स इषुहस्तैः स निषङ्गिभि र्वशीसग्ग् स्त्रष्टा स युध इंद्रो गणेन। सगृंसृष्टजिथ्सोमपा बाहुश र्ध्यूर्ध्व धन्वा प्रतिहिताभिरस्ता॥

sa iṣuhastaiḥ sa niṣajñgibhi rvaśīsagg sraṣṭā sa yudha indro gaṇena| sagṁsṛṣṭajithsomapā bāhuśa rdhyūrdhva dhanvā pratihitābhirastā||

बृहस्पते परि दीया रथेन रक्षोहाऽमित्रागं् अपबाधमानः॥ प्रभन्ज्ञन्स्थेनाः प्रमृणो युधा जय न्नस्माक मेध्यविता रथनां॥

bṛhaspate pari dīyā rathena rakṣohā'mitrāgm apabādhamānaḥ|| prabhanjñansthenāḥ pramṛṇo yudhā jaya nnasmāka medhyavitā rathanāṁ||

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रणन्त मोजसा। इमगं सजाता अनुवीरयध्व मिन्द्रगं् सखायोऽनुसगं रभध्वं॥

gotrabhidaṁ govidaṁ vajrabāhuṁ jayantamajma pramr̥̄ṇanta mojasā| imagṁ sajātā anuvīrayadhva mindragṁ sakhāyo'nusagṁ rabhadhvaṁ||

बलविज्ञयः स्थविरः प्रवीरः सहस्वान् वजी सहमान उग्रः। अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित्॥

balavijñayaḥ sthaviraḥ pravīraḥ sahasvān vajī sahamāna ugraḥ| abhivīro abhisatvā sahojā jaitramindra rathamā tiṣṭha govit||

अभिगोत्राणि सहस गाहमानोऽदायो वीरः शतमन्यु रिन्द्रः । दुश्च्यवनः पृतनाषा ड्युध्यो ऽ स्मकग्ं सेना अवतु प्रयुथ्सु ॥

abhigotrāṇi sahasa gāhamāno'dāyo vīraḥ śatamanyu rindraḥ| duścyavanaḥ pṛtanāṣā ḍayudhyo ' smakagṁ senā avatu prayuthsu||

इंद्र आसां नेता बृहस्पति र्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनाना मभिभंजतीनां जयंतीनां मरुतो यन्त्वग्रे ॥

indra āsāṁ netā bṛhaspati rdakṣiṇā yajñaḥ pura etu somaḥ| devasenānā mabhibhañjatīnāṁ jayantīnāṁ maruto yantvagre||

इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताग्ं शर्ध उग्रं । महामनसां भुवनच्यवानां घोषो देवानां जयता मुदस्थात् ॥

indrasya vṛṣṇo varuṇasya rājña ādityānāṁ marutāgṁ śardha ugraṁ| mahāmanasāṁ bhuvanacyavānāṁ ghoṣo devānāṁ jayatā mudasthāt||

अस्माक मिंद्रः समृतेषु ध्वजे ष्वस्माकं या इषव स्ता जयन्तु । अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु ॥

asmāka mindraḥ samṛteṣu dhvaje ṣvasmākaṁ yā iṣava stā jayantu| asmākaṁ vīrā uttare bhavantvasmānu devā avatā haveṣu||

उद्धर्षय मघवन्नायुधान्युथ्सत्वनां मामकानां महाग्ंसि । उद्वृत्रहन् वाजिनां वाजिना न्युद्रथानां जयता मेतु घोषः ॥

uddharṣaya maghavannāyudhānyuthsatvanāṁ māmakānāṁ mahāgṁsi| udvṛtrahan vājināṁ vājinā nyudrathānāṁ jayatā metu ghoṣaḥ||

उपप्रेत जयता नरः स्थिरा वः सन्तु बाहवः । इंद्रो वः शर्म यछ्छत्वनाधृष्या यथाऽसथ ॥

upapreta jayatā naraḥ sthirā vaḥ santu bāhavaḥ| indro vaḥ śarma yachchatvanādhṛṣyā yathā'satha||

अवसृष्टा परा पत शरव्ये ब्रह्मसग्ंशिता । गछ्छामित्रान् प्रविश मैषां कं चनोछ्छिषः ॥

avasṛṣṭā parā pata śaravye brahmasagṁśitā| gachchāmitrān praviśa maiṣāṁ kaṁ canochchiṣaḥ||

मर्माणि ते वर्मभिस्चादयामि सोम स्त्वा राजाऽमृतेनाऽभिवस्तां । उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदंतु देवाः ॥

marmāṇi te varmabhiscādayāmi soma stvā rājā'mṛtenā'bhivastāṁ| urorvarīyo varivaste astu jayantaṁ tvāmanu madantu devāḥ||

यत्र बाणाः संपतन्ति कुमारा विशिखा इव । इन्द्रो न स्तत्र वृत्रहा विस्वाहा शर्म यच्छ्छतु ॥

yatra bāṇāḥ sampatanti kumārā viśikhā iva| indro na statra vṛtrahā visvāhā śarma yachchatu||

असुरानजयन्त दप्रतिरथस्या प्रतिरथत्वं यदप्रतिरथं द्वितीयोहोतान्वाहा प्रत्येव तेन यजमानो भ्रातृव्यां जयत्यथो अनभिजितमे वाभिजयति दशर्चं भवति दशाक्षरा विराड्विराजेमौ लोकौ विधृता वनयोर्लोकयो र्विधृत्या अथो दशाक्षरा विराडन्नं विराड्विराज्ये वान्नाद्ये प्रति तिष्टत्यसदिव वा अन्तरिक्ष मन्तरिक्ष मिवाग्नीध्र माग्नीध्रे ॥

asurānajayanta dapratirathasyā pratirathatvaṁ yadapratiratham dvitīyohotānvāhā pratyeva tena yajamāno bhrātṛvyām jayatyatho anabhijitame vābhijayati daśarcaṁ bhavati daśākṣarā virāḍvirājemau lokau vidhṛtā vanayorlokayo rvidhṛtyā atho daśākṣarā virāḍannaṁ virāḍvirājye vānnādye prati tiṣṭatyasadiva vā antarikṣa mantarikṣa mivāgnīdhra māgnīdhre||

ॐ नमो भगवते रुद्राय ॥ आशुः शिशानोऽप्रतिरथं कवचाय हुं ॥

om namo bhagavate rudrāya|| āśuḥ śiśāno'pratirathaṁ kavacāya huṁ||